# shrIshivapa nchAnanastotram

# શ્રીશિવપઞ્ચાનનસ્તોત્રમ્ પઞ્ચમુખ શિવ

## Document Information

Text title : shivapanchAnanastotram

File name : shivapanchAnanastotram.itx

Category : panchaka, shiva

Location : doc_shiva

Transliterated by : Shree Devi Kumar

Proofread by : Shree Devi Kumar, PSA Easwaran

Latest update : November 22, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

August 30, 2023

*sanskritdocuments.org*

# shrIshivapa nchAnanastotram

# શ્રીશિવપઞ્ચાનનસ્તોત્રમ્ પઞ્ચમુખ શિવ

Panchaanana, Panchavaktra or Panchamukhi Shiva is the combination of Shiva in all five of His aspects – aghora, IshAna, tatpuruSha, vAmadeva and saddyojAta. The Panchamukha Shiva linga is found in rare temples. Four faces are in four directions and in some the fifth face is shown facing the sky and in some it is in the southeast direction. The jyotirlinga at Pashupatinath temple in Nepal is a panchamukha linga.

The five shiva forms, directions, elements and associated shakti forms are:

સદ્યોજાત - પશ્ચિમ - પૃથ્વી - સૃષ્ટિ શક્તિ
વામદેવ - ઉત્તર - જલ - સ્થિતિ શક્તિ
તત્પુરુષ - પૂર્વ - વાયુ - તિરોભાવ શક્તિ
અઘોર - દક્ષિણ - અગ્નિ - સંહાર શક્તિ
ઈશાન - ઊર્ધ્વ - આકાશ - અનુગ્રહ શક્તિ

panchamukha shiva gayatri is:
ૐ પઞ્ચવક્ત્રાય વિદ્મહે, મહાદેવાય ધીમહિ,
તન્નો રુદ્ર પ્રચોદયાત્ ॥

The following five verses are considered prayers to Shiva facing each of the five different directions. These same verses with slight variations and change in order are used in panchamukhanyAsa as part of mahAnyAsam and in panchavaktrapUjA.

All three versions are given below.

॥ શિવપઞ્ચાનનસ્તોત્રમ્ ॥

પ્રાલેયાચલમિન્દુકુન્દધવલં ગોક્ષીરફેનપ્રભં
ભસ્માભ્યઙ્ગમનઙ્ગદેહદહનજ્વાલાવલીલોચનમ્ ।
વિષ્ણુબ્રહ્મમરુદ્ગણાર્ચિતપદં ઋગ્વેદનાદોદયં
વન્દેઽહં સકલં કલઙ્કરહિતં સ્થાણોર્મુખં પશ્ચિમમ્ ॥ ૧॥

ગૌરં કુઙ્કુમપઙ્કિલં સુતિલકં વ્યાપાણ્ડુકણ્ઠસ્થલં
ભ્રૂવિક્ષેપકટાક્ષવીક્ષણલસત્સંસક્તકર્ણોત્પલમ્ ।
સ્નિગ્ધં બિમ્બફલાધરં પ્રહસિતં નીલાલકાલઙ્કૃતં
વન્દે યાજુષવેદઘોષજનકં વક્ત્રં હરસ્યોત્તરમ્ ॥ ૨॥

સંવર્તાગ્નિતટિત્પ્રતપ્તકનકપ્રસ્પર્દ્ધિતેજોમયં
ગમ્ભીરધ્વનિ સામવેદજનકં તામ્રાધરં સુન્દરમ્ ।
અર્ધેન્દુદ્યુતિભાલપિઙ્ગલજટાભારપ્રબદ્ધોરગં
વન્દે સિદ્ધસુરાસુરેન્દ્રનમિતં પૂર્વં મુખં શૂલિનઃ ॥ ૩॥

કાલાભ્રભ્રમરાઞ્જનદ્યુતિનિભં વ્યાવૃત્તપિઙ્ગેક્ષણં
કર્ણોદ્ભાસિતભોગિમસ્તકમણિ પ્રોત્ફુલ્લદંષ્ટ્રાઙ્કુરમ્ ।
સર્પપ્રોતકપાલશુક્તિસકલવ્યાકીર્ણસચ્છેખરં
વન્દે દક્ષિણમીશ્વરસ્ય વદનં ચાથર્વવેદોદયમ્ ॥ ૪॥

વ્યક્તાવ્યક્તનિરૂપિતં ચ પરમં ષટ્ત્રિંશતત્ત્વાધિકં
તસ્માદુત્તરતત્વમક્ષરમિતિ ધ્યેયં સદા યોગિભિઃ ।
ઓઙ્કારદિ સમસ્તમન્ત્રજનકં સૂક્ષ્માતિસૂક્ષ્મં પરં
વન્દે પઞ્ચમમીશ્વરસ્ય વદનં ખવ્યાપિતેજોમયમ્ ॥ ૫॥

એતાનિ પઞ્ચ વદનાનિ મહેશ્વરસ્ય
યે કીર્તયન્તિ પુરુષાઃ સતતં પ્રદોષે ।
ગચ્છન્તિ તે શિવપુરીં રુચિરૈર્વિમાનૈઃ
ક્રીડન્તિ નન્દનવને સહ લોકપાલૈઃ ॥

ઇતિ શિવપઞ્ચાનનસ્તોત્રં સમ્પૂર્ણમ્ ॥

॥ પઞ્ચવક્ત્રપૂજાન્તર્ગતમ્ ॥

ૐ પ્રાલેયામલબિન્દુકુન્દધવલં ગોક્ષીરફેનપ્રભં
ભસ્માભ્યઙ્ગમનઙ્ગદેહદહનજ્વાલાવલીલોચનમ્ ।
બ્રહ્મેન્દ્રાગ્નિમરુદ્ગણૈઃ સ્તુતિપરૈરભ્યર્ચિતં યોગિભિ-

વન્દેऽહં સકલં કલઙ્કરહિતં સ્થાણોર્મુખં પશ્ચિમમ્ ॥

ૐ પશ્ચિમવક્ત્રાય નમઃ ॥ ૧॥

ૐ ગૌરં કુઙ્કુમપિઙ્ગલં સુતિલકં વ્યાપાણ્ડુગણ્ડસ્થલં
ભ્રૂવિક્ષેપકટાક્ષવીક્ષણલસત્સંસક્તકર્ણોત્પલમ્ ।
સ્નિગ્ધં બિમ્બફલાધરં પ્રહસિતં નીલાલકાલઙ્કૃતં
વન્દે પૂર્ણશશાઙ્કમણ્ડલનિભં વક્ત્રં હરસ્યોત્તરમ્ ॥

ૐ ઉત્તરવક્ત્રાય નમઃ ॥ ૨॥

ૐ કાલાભ્રભ્રમરાઞ્જનાચલનિભં વ્યાદીપ્તપિઙ્ગેક્ષણં
ખણ્ડેન્દુદ્યુતિમિશ્રિતોગ્રદશનપ્રોદ્ભિન્નદંષ્ટ્રાઙ્કુરમ્ ।
સર્વપ્રોતકપાલશુક્તિસકલં વ્યાકીર્ણસચ્છેખરં
વન્દે દક્ષિણમીશ્વરસ્ય જટિલં ભ્રૂભઙ્ગરૌદ્રં મુખમ્ ॥

ૐ દક્ષિણવક્ત્રાય નમઃ ॥ ૩॥

ૐ સંવર્ત્તાગ્નિતડિત્પ્રતપ્તકનકપ્રસ્પર્ધિતેજોમયં
ગમ્ભીરસ્મિતનિઃસૃતોગ્રદશનં પ્રોદ્ભાસિતામ્રાધરમ્ ।
બાલેન્દુદ્યુતિલોલપિઙ્ગલજટાભારપ્રબદ્ધોરગં
વન્દે સિદ્ધસુરાસુરેન્દ્રનમિતં પૂર્વં મુખં શૂલિનઃ ॥

ૐ પૂર્વવક્ત્રાય નમઃ ॥ ૪॥

ૐ વ્યક્તાવ્યક્તગુણોત્તરં સુવદનં ષડ્વિંશતત્ત્વાધિકં
તસ્માદુત્તરતત્ત્વમક્ષયમિતિ ધ્યેયં સદા યોગિભિઃ ।
વન્દે તામસવર્જિતેન મનસા સૂક્ષ્માતિસૂક્ષ્મં પરં
શાન્તં પઞ્ચમમીશ્વરસ્ય વદનં ખવ્યાપિતેજોમયમ્ ॥

ૐ ઊર્ધ્વવક્ત્રાય નમઃ ॥ ૫॥

॥ પઞ્ચમુખન્યાસાન્તર્ગતમ્ ॥

તત્પુ॑રુષાય વિ॒દ્મહે॑ મહાદે॒વાય॑ ધીમહિ । તન્નો॑ રુદ્રઃ પ્રચો॒દયા᳚ત્ ॥

સંવર્તાગ્નિ-તટિત્પ્રદીપ્ત-કનકપ્રસ્પર્દ્ધિ-તેજોऽરુણં
ગમ્ભીરધ્વનિ-સામવેદજનકં તામ્રાધરં સુન્દરમ્ ।
અર્દ્ધેન્દુદ્યુતિ-લોલ-પિંગલ જટા ભાર-પ્રબોદ્ધોદકં
વન્દે સિદ્ધસુરાસુરેન્દ્ર-નમિતં પૂર્વં મુખં શૂલિનઃ ॥

ૐ નમો ભગવતે રુદ્રાય । પૂર્વાઙ્ગ મુખાય નમઃ ॥ ૧ ॥

અઘોરેભ્યોઽથ ઘોરેભ્યો ઘોરઘોરતરેભ્યઃ ।
સર્વેભ્યઃ સર્વશર્વેભ્યો નમસ્તે અસ્તુ રુદ્રરૂપેભ્યઃ ॥

કાલાભ્ર-ભ્રમરાઞ્જન-દ્યુતિનિભં વ્યાવૃત્તપિઙ્ગેક્ષણં
કર્ણોદ્ભાસિત-ભોગિમસ્તકમણિ-પ્રોદ્ભિન્નદંષ્ટ્રાઙ્કુરમ્ ।
સર્પપ્રોતકપાલ-શુક્તિશકલ-વ્યાકીર્ણતાશેખરં
વન્દે દક્ષિણમીશ્વરસ્ય વદનં ચાથર્વનાદોદયમ્ ॥

ૐ નમો ભગવતે રુદ્રાય । દક્ષિણાઙ્ગ મુખાય નમઃ ॥ ૨ ॥

સદ્યોજાતં પ્રપદ્યામિ સદ્યો જાતાય વૈ નમો નમઃ ।
ભવે ભવે નાતિભવે ભવસ્વ મામ્ । ભવોદ્ભવાય નમઃ ॥

પ્રાલેયામલમિન્દુકુન્દ-ધવલં ગોક્ષીરફેનપ્રભં
ભસ્માભ્યઙ્ગમનઙ્ગદેહદહન-જ્વાલાવલીલોચનમ્ ।
વિષ્ણુબ્રહ્મમરુદ્ગણાર્ચિતપદં ઋગ્વેદનાદોદયં
વન્દેઽહં સકલં કલઙ્કરહિતં સ્થાણોર્મુખં પશ્ચિમમ્ ॥

ૐ નમો ભગવતે રુદ્રાય । પશ્ચિમાઙ્ગ મુખાય નમઃ ॥ ૩ ॥

વામદેવાય નમો જ્યેષ્ઠાય નમઃ શ્રેષ્ઠાય નમો રુદ્રાય નમઃ
કાલાય નમઃ કલવિકરણાય નમો બલવિકરણાય નમો બલાય નમો
બલપ્રમથનાય નમસ્સર્વભૂતદમનાય નમો મનોન્મનાય નમઃ ॥

ગૌરં કુઙ્કુમ પઙ્કિલમ્ સુતિલકં વ્યાપાણ્ડુમણ્ડસ્થલં
ભ્રૂવિક્ષેપ-કટાક્ષવીક્ષણલસત્સંસક્તકર્ણોત્પલમ્ ।
સ્નિગ્ધં બિમ્બફલાધરં પ્રહસિતં નીલાલકાલઙ્કૃતં
વન્દે યાજુષ-વેદઘોષજનકં વક્ત્રં હરસ્યોત્તરમ્ ॥

ૐ નમો ભગવતે રુદ્રાય । ઉત્તરાઙ્ગ મુખાય નમઃ ॥ ૪ ॥

ઈશાનસ્સર્વવિદ્યાનામીશ્વરઃ સર્વ ભૂતાનાં
બ્રહ્માધિપતિર્બ્રહ્મણોઽધિપતિર્બ્રહ્મા શિવો મે અસ્તુ સદાશિવોમ્ ॥

વ્યક્તાવ્યક્તનિરૂપિતઞ્ચ પરમં ષટ્ત્રિંશતત્વાધિકં
તસ્માદુત્તર-તત્વમક્ષરમિતિ ધ્યેયં સદા યોગિભિઃ ।

ઓંકારાદિ-સમસ્તમન્ત્રજનકં સૂક્ષ્માતિસૂક્ષ્મં પરં
વન્દે પઞ્ચમમીશ્વરસ્ય વદનં ખ-વ્યાપિ તેજોમયમ્ ॥
ૐ નમો ભગવતે રુદ્રાય । ઊર્દ્ધ્વાઙ્ગ મુખાય નમઃ ॥ ૫ ॥

Encoded by Shree Devi Kumar
Proofread by Shree Devi Kumar, PSA Easwaran

*shrIshivapa nchAnanastotram*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*